# ॥ केतुपञ्चविंशतिनामस्तोत्रम् ॥

केतुः कालः कलयिता धूम्रकेतुर्विवर्णकः।
लोककेतुर्महाकेतुः सर्वकेतुर्भगप्रदः ॥ १ ॥

रौद्रो रुद्रप्रियो रुद्रः क्रूरकर्मा सुगन्धधृक्।
पलालधूमसङ्काशश्चित्रयज्ञोपवीतधृक् ॥ २ ॥

तारागणविमर्दी च जैमिनेयो ग्रहाधिपः।
गणेशदेवो विघ्नेशो विषरोगार्तिनाशनः ॥ ३ ॥

प्रव्राज्यदो ज्ञानदश्च तीर्थयात्राप्रवर्तकः।
पञ्चविंशतिनामानि केतोर्यः सततं पठेत् ॥ ४ ॥

तस्य नश्यति बाधा च सर्वा केतुप्रसादतः।
धनधान्यपशूनां च भवेद्वृद्धिर्न संशयः ॥ ५ ॥

॥ इति श्री-स्कान्दपुराणे श्री-केतुपञ्चविंशतिनामस्तोत्रं सम्पूर्णम् ॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Ketu_Panchavimshati_Nama_Stotram.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits